*Pragya Darshan 2024, 6(1): 68-70*
*ISSN: 2542-2634 (print)*
*@DEPAN, UCU*
*Research Article*

# वैदिकसाहित्ये विश्वशान्तिस्तथा सद्भावः

**गोविन्द घिमिरे (आकाशनीलम्)**

**त्रि.वि. संस्कृतकेन्द्रीयविभागः, कीर्तिपुरम्**

*Correspeonding mail:* aakashnilam8@gmail.com

Received: 3rd September, 2023; Revised: 7th December, 2023; Accepted: 15th December, 2023

**प्रस्तावना**

ऊर्ध्वरेतोभिर्महर्षिरगाधतपश्चर्यया परमात्मनो नि:श्वासग्रहणनिपुणया वेदा: साक्षात्कृता इति सर्वेषां वाङ्मयानां वेदैकशरणानां सर्वसम्मतम्मतम्भ्राजते। अमीषां वेदानां संरक्षणाय, संवर्धनाय, प्रचारणाय, प्रवचनाय, के महर्षयो वेदाङ्गानि, रामायणं, महाभारतं, पुराणानि, के आधुनिककवय: काव्यानि, के ऐतिह्यविद इतिहासान् न समाम्नासिषु:? सर्वाणि वेदाङ्गानि, सर्वाणि रामायणमहाभारतादीन्यार्षाण्याधुनिकानि वा काव्यानि मुक्तकण्ठेन कथं वेदान् अनुसरन्ति, वेदान् अधि लिखन्ति, वेदान् सिषाधयिषन्तीति विचारणपरेणास्माभिरुपलब्धं यदत्र समग्रे वाङ्मये न केवलं भारतीये, तदिरतस्मिन् वाङ्मये वैदेशिकेऽपि वेदोक्ता विषया: सार्वभौमिकाः, त्रैकालिकाः, कल्याणाधायका इत्युक्तत्वादमी वेदा: सर्वैरेवादर्त्तव्या: सर्वप्रयत्नेनाध्ययनीयाः, प्रसारणीया, आचरणीया इति। वेदेऽमुष्मिन् वेदसम्बद्धेष्वन्येषु वाङ्मयेषु वा दयाहिंसास्तेयजितेन्द्रियत्वसर्वभूतसद्भावमैत्रीभावादयोऽनेके विषयास्तथाभूता: सन्ति ये विश्वस्य कल्याणाय, विश्वस्मिन् विश्वे शान्तिसंस्थापनार्थाय महर्षिभि:कल्याणैकचक्षुष्कै: समाम्नाता:।

**विषयोपस्थापनम्-**

विश्वस्मिन् शान्तिसंस्थापनार्थाय, सद्भावाय चानेके विषया: समुपबृंहिता: सन्ति। तेष्वत्र विचारणीया विषया यथा-

१.अहिंसा

२. मैत्रीभाव:

३. जितेन्द्रियत्वम्

४.सर्वभूतसद्भाव:

**१.अहिंसा**

अहिंसा महर्षिणा बादरायणेन परमो धर्मो निगदित इति विदितमेव तत्रभवतां विदितवेदितव्यानां विपश्चिद्वेद्यानाम्। अमुष्या अहिंसाया परमधर्मता कुत: किञ्चामुष्या विश्वशान्त्यै उपयोगितेत्यपि विविदिषेयम्प्रकृतस्थले उदेति। हिंसाकर्तारो ये आसुरप्रवृत्त्या प्रवृत्ता: तेषां दमनेन हिंसाया नाशेनाहिंसाया: प्रतिष्ठा सम्भवत्यतोऽसुराणां दमनस्योपदेशोऽथर्वणि विद्यते।

**सम्राडस्यसुराणां ककुन्मनुष्याणाम्।**

**देवानामर्धभागसि त्वमेकवृषो भव।।[1]**

अत्रासुराणां नाशेन हिंसाया उपमशनं भवत्यतोऽसुराणां नाशको देवानामर्धभागो, मानवानां श्रेष्ठोऽपि निगदित:। दुष्टानां दुष्कर्मणां प्राणिनां नाशाय प्रार्थना महर्षिणा विहिता विद्यते। यतो दुष्टमानवा: प्रतिपदमन्यान् पीडयन्तो हिंसानद्यामवगाहनमत्तचेतस: समाजे भीतिमुत्पादयन्त्यत एतादृशानां नाशेनाहिंसाया उपस्थापनायै मरुत: स्तुतो विद्यते। वेदेषु हिंसाया: प्रतिरोधात्मिका हिंसा निहिता विद्यते यया हिंसया अहिंसाया: संरक्षणं भवेत्।

**यो नो मर्तो मरुतो दुर्हणायु: तिरश्चित्तानि वसवो जिघांसति।**

**द्रुहः पाशान् प्रति मुञ्चतां स:तपिष्ठेन तपसा हन्तना तम्।[2]**

ये गोमानुषाश्वहिंसया मोमुद्यन्ते आहोस्विद्गोमानुषाश्वहिंसाश्चेक्रियन्ते ते हिंसाप्रचारणपरायणा: सीसवेधेन दण्डनीया इत्युपदेश एकस्मिन् मन्त्रे विद्यते। हिंस्रकेभ्य एतादृशं दण्डविधानमस्मान् ज्ञपयति

[1] अथर्ववेदः ६.८६.३

[2] अथर्ववेदः ७.८२.२

यदस्माभिर्हिंसायास्त्यागपुरस्सरं हिंसाविरुद्धस्य ज्ञानस्य प्रचार: कर्तव्य:।

**यदि नो गां हंसि यद्यश्वं यदि पूरुषम्।**

**तं त्वा सीसेन विध्यामो यथा नो सो अवीरहा।।**[3]

यज्ञादिषु विधिष्वपि हिंसाया निषेधपरकं वचनमुपलभ्यते। पशून् संहत्य पशूनामवयवैराहोस्वादन्येषां केषामपि प्राणिनामवयवैर्यो यागं सम्पादयति स यजमानोऽत्यन्तं गर्हितो विद्यते वेदेषु। एवंरीत्या धर्माडम्बराम्बरावृता प्राणिहिंसका यजमाना: निन्दिता:, अनेन ज्ञायते धर्मनाम्ना विहिता हिंसा पुण्याय न भवतीति। प्रकृतस्थले अहिंसातत्त्वाचरणपरायणानां प्रशंसापि विहिता ऋषिभि:। अद्यत्वे धर्मनाम्ना जायमाना हिंसा भृशमवलोक्यते, अमुष्या हिंसाया उपशमनाय प्रयत्नो विधेयो भवत्यस्माभिर्यत इदमनुशासनमृषीणां विद्यते। अमुष्यानुशासनस्य परिपालनेन वैश्विकशान्तिर्दृढीभविष्यति। यथा समाम्नासीद्वेदे ऋषि:-

**मुग्धा देवा उत शुना यजन्तोत गोरङ्गै: पुरुधा यजन्त।**

**य इमं यज्ञं मनसा चिकेत प्रणो वोचस्तमिहेह ब्रुव:।।**[4]

**२.मैत्रीभाव:**

मैत्रीभावनामन्तरा विश्वशान्ते: कल्पना भवितुमर्हतीति न भवति युक्तियुक्तं वच:। मित्रं नाम सुखदु:खैकमार्ग:। मित्रस्य भावनया समाजे व्याप्ता वर्णविभेद:, जातिविभेद:, धर्मविभेद:, सम्प्रदायविभेद:, प्रान्तविभेदादयोऽनेके दोषा ये विश्वशान्तेर्घातका वरीवृत्यन्ते तेषामुपशमनं भवति। अतो वेदा मैत्रीभावनाया उपदेशेन सम्पृक्ता: सन्ति। मैत्रीभावनया सर्वान् मानुषान् प्राणिनो वा दिदृक्षुर्मानवो वस्तुतो विश्वस्मिन् विश्वे शान्तिं दृढीकर्तुं शक्नोतीति महर्षीणां द्रढीयान् विश्वास:। सर्वे प्राणिनो मे मित्राणि वर्तन्तेऽहं च सर्वेषां मित्रं वर्ते इत्येतां भावनां प्रथयितुं मन्त्रा ऋषिभिरुदीरिता:।

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**

**मित्रस्य चक्षुषा समीक्षामहे।।**[5]

अनया मैत्रीभावनया च वेदोक्ता अनेके सौमनस्यसम्बद्धा मन्त्रा: सफलीभवन्ति। समानं वच:, समाना गति:, समानं मन:, समानं हृदयमस्माकं तदैव भवितुमर्हति यदा मैत्रीभावनास्माकं मत्यां भवेत्। अनया च भावनया विश्वशान्तिरवश्यमेवाक्षिलक्ष्यीभविष्यतीति विश्वसिम:। अतो वेदा आकारयन्ति-

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**

**देवा भागं यथा पूर्वे संजानाना उपासते।।**[6]

**समानि व: आकूति: समाना हृदयानि व:।**

**समानमस्तु वो मनो यथा व: सुसहासति।।**[7]

मैत्रीभावं मनसि निधाय केनापि प्राणिना सह द्वेषो न कर्तव्य इत्युपदेशोऽपि वेदे निहितो वर्तते।

**मा नो द्विक्षत कश्चन।**[8]

द्वेषिणो ये मानवा मैत्रीभावं निहन्ति ते उषादेव्या दण्डेन दूरीक्रियन्ते इति दिशा द्वेषभावनाया निन्दा प्रकृतस्थले दृश्यते।

**अप द्वेषो मघोनी दुहिता दिव उषा उच्छदपस्त्रिध:।**[9]

**३.जितेन्द्रियत्वम्**

अस्यापि तत्त्वस्य विश्वशान्त्यै अद्वितीया भूमिका विद्यते। यतो यस्य मानवस्य स्वस्येन्द्रियेष्वधिकारो नास्ति स क्रोध बलात्कार प्रताडनादिभि: शान्तिभङ्गाय कल्पते। विश्वशान्त्यै प्रत्येकं मानवस्य जितेन्द्रियत्वमप्यपेक्षते। जितेन्द्रिय एव मानुष: श्रेष्ठो भवितुमर्हति लोककल्याणाय च कल्पते। अद्यत्वे समाजे जितेन्द्रियत्वा 2भावाद्बलात्कारप्रताडनादयो विषया अक्षिलक्ष्यीक्रियन्त एवास्माभि:। वेदेष्वेतेषां विषयाणामुपशमनाय निर्देशो वर्तते। रसनेन्द्रिये यदा स्वाधिकारो न भवति तदा मानव: सुरापानमांसाहारादिषु विपरीतकर्मसु प्रवृत्तो भवति। सुरापानेन हिंसोत्पद्यत इति तु वस्तुस्थिति:, अहिंसया च मांसाहारासम्भव:। उभावपि विषयौ शान्तिनाशाय कल्प्येते अथ चेमौ विषयौ रसनेन्द्रिये स्वाधिकाराभावाद्वर्तेते। एवमेव मनसि स्वाधिकाराभावात्क्रोध उत्पद्यते परस्य कृत्याथ च क्रोधादपि हिंसा जायत एवेति निश्चप्रचम्, अत: मनसो निग्रहोऽपि विश्वशान्त्यै कल्प्यते। अतो वेदै: क्रोधनाशाय, सुरात्यागाय चोपदेशोऽस्मभ्यं प्रदत्त:।

[3] अथर्ववेद: १.१६.४

[4] अथर्ववेद: ७.५.५

[5] शुक्लयजुर्वेद: ३६.१८

[6] ऋग्वेद: १०.१९१.२

[7] ऋग्वेद: १०.१९१.४

[8] अथर्ववेद: १२.१२.६

[9] ऋग्वेद: १.४८.८

**न स स्व दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः।**[10]

**४.सर्वभूतसद्भावः**

सर्वेऽपि प्राणिनः परमेश्वरस्यांशा अतः सर्वैः प्राणिभिः समं सदाचारेण व्याहर्तव्यम् अयमेव व्याहारः सर्वभूतसद्भावपदेन व्यपदिश्यते। विश्वशान्त्यै सद्भावनाया अद्वितीयं महत्त्वं विद्यते। एतदर्थमृषिर्भृशमुपदिशति मानुषेभ्यो वेदमुखेन। ऋषिरुपदिशति सर्वान् प्राणिनः स्वात्मन्यवलोक्य सर्वेऽपि ममैवांशाः, अहञ्च सर्वेषामंशः, सर्वेषां जनक एक एव, पालक एक एवेति मत्वा यः सर्वत्र सर्वेषु च स्वात्मानं पश्यति स घृणामपहाय निर्घृणः सर्वैः साकं सद्भावेन जीवति। कस्यापि प्राणिनो हितकृन्न सम्पद्यते। एवमेव यदि सर्वे प्राणिनः परस्परं सद्भावनया सम्पृक्ताः वर्तेरंस्तदा निश्चयेन विश्वस्मिन् विश्वे शान्तिः स्यादेव। यतः आतङ्कवादः, धर्मसम्बद्धा हिंसा, क्षेत्रसम्बद्धा हिंसा, परोत्पीडनमित्येते दोषाः सद्भावनामन्तरा प्रतिपदमनुबोभूयन्ते ऽस्माभिरतोऽस्य सर्वभूतसद्भावस्योपदेशः साक्षात्कृत विश्व कल्याणैर्मनीषिभिरस्मभ्यमदायि।

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**[11]

यदि सर्वभूतेष्वैक्यदिदृक्षुर्वर्तते कश्चिच्चेदमुष्मिन् मानवे मोहो नावशिष्यते नापि शोको विजायते तस्य हृदये, एतयोरभावे स मानुषः आत्मनि परजनान्, परजनात्मन्यात्मानमवलोक्य सर्वैः साकं सदाचरति। इयं च भवति प्रथमा सरणिर्विश्वशान्तेः। यथोपदिष्टं मन्त्रैः

**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**

**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।।**[12]

सर्वभूतसद्भावो नाम एकत्वम्। अस्यैकत्वस्य विश्वशान्त्यै अपरिहार्यता विद्यते। अनेकैः शरीरैः, आत्मभिः, इन्द्रियैः, विचारैः, रूपैः, जातिभिः विस्तीर्ण्णा वयममी समानं फलं कामयमानाः समानरीत्या अग्निदेवस्य स्तुतिं कुर्मः, समानमन्नम् अद्मः, समानं पानीयं पिबाम इत्युपदेशो वर्तते मन्त्रे।

**समानी प्रपा सह वोन्नभागः समाने योक्त्रे स वो युनज्मि।**

**सम्यञ्चोग्निं सपर्यतारा नाभिमिवाभितः।।**[13]

अथर्ववेदे ऋषिः प्रार्थयति सर्वाः प्रजाः ऐकमत्येन, एकविचारेण, एकलक्ष्येण विश्वहिताय अग्रेसरन्तु पुष्टपतेः प्रसादेन। विचाराणामनेकतायां विवादः, भ्रष्टाचारः, शोषणादयो जायन्ते, अतो हेतोः एकत्वस्योपदेशः प्रदत्तः, एकत्वं च मैत्रीभावनां पुष्णाति।

**संजानानाः सम्मनसः सयोनयो मयि पुष्टं पुष्टपतिर्दधातु।।**[14]

परस्परं सद्भावनया वयं विषयाणां भोगं कुर्मः तेजस आधानं कुर्म इति सद्भावनाया उपदेशोऽपि विद्यते।

**सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।**[15]

सदाचारपरायणाः परस्परं सपरिवारा मानवाः मधुरां वाचं प्रसार्य्य शान्तिप्रदायकं वाक्यं ब्रूयुस्तथा च सद्भावनायाः प्रसारं कुर्युरित्युपदेशो निहितो वर्तते वेदे।

**अनुव्रतः पितुः पुत्रो माता भवतु सम्मनाः।**

**जाया पत्ये मधुमती वाचं वदतु शान्तिवाम्।।**[16]

**उपसंहृतिः**

इत्येवम्प्रकारेण सकलेऽपि वैदिकसाहित्येऽनेकैर्विषयैः साकं विश्वशान्तेस्तदर्थञ्च सद्भावनायाः विशदतयोपदेशः समाम्नातो वर्तते। वस्तुतः विश्वशान्तेः सद्भावनायाश्च परस्परम् अङ्गाङ्गीभावो विद्यते। इमे उभे अपि तत्त्वेऽन्योन्याश्रिते विद्येते, यतः सद्भावमन्तरा विश्वशान्त्याः कल्पना गगनारविन्दे सुरभिरिव विद्यते। अङ्गाङ्गीभावे च किमङ्गं कश्चाङ्गीति विचारणपरायणेन मयावाप्तं मैत्रीभाव सर्वभूतसद्भावादयो विषया अङ्गानि एतैश्चाङ्गैरनेकैरुपक्रियमाणा विश्वशान्तिरङ्गीति। एवंरीत्या चतुर्भिरंशैर्मया वैदिकसाहित्ये निहितानि विश्वशान्तिनिमित्तीभूतानि तत्त्वानि यथामति प्रत्यपादि। वस्तुतः एतेषाञ्चतुर्णामंशानां सम्यगाचरणेन प्रचारणेन च विश्वस्मिन् विश्वे शान्तिः उपस्थापयितुं दृढीकर्तुञ्चास्माभिः शक्यतेतमाम् इति विचार्य मया विषयोऽयञ्चतुर्भिरंशैः स्फुटीकृतः। वैदिकसाहित्ये विशदीकृतानाममीषां सर्वेषां विश्वशान्तिनिमित्तीभूतानां तत्त्वानां निरूपणमुडुपेन सिन्धुतीतीर्षया तुल्यम्। विश्वशान्त्यर्थं वेदानामपरिहार्यता वरीवर्तीति मन्यमानो वाग्विस्तरं विरिरंसामि।

---

[10] ऋग्वेदः ७.८६.६

[11] शुक्लयजुर्वेदः ४०.६

[12] शुक्लयजुर्वेदः ४०.७

[13] अथर्ववेदः ३.३०.६

[14] अथर्ववेदः ७.२०.१

[15] कठोपनिषदत् द्वितीयोध्यायः,तृतीयवल्ली १९

[16] पैप्पलादसंहिता ५.२